रविवार प्रि

प्रश्न–पुस्तिका संख्या व बारकोड/
Question Booklet No. & Barcode

226477

# ALP-23

इस प्रश्न-पुस्तिका को तब तक न खोलें जब तक कहा न जाए । Do not open this Question Booklet until you are asked to do so.

पुस्तिका में पृष्ठों की संख्या : 16
Number of Pages in Booklet : 16
पुस्तिका में प्रश्नों की संख्या : 150
No. of Questions in Booklet : 150

**Paper Code : 45**

## Sub : Sanskrit - I
## Paper-I

**समय : 03:00 घण्टे + 10 मिनट अतिरिक्त***
**Time : 03:00 Hours + 10 Minutes Extra***

**अधिकतम अंक : 75**
**Maximum Marks : 75**

प्रश्न–पुस्तिका के पेपर की सील/पॉलिथीन बैग को खोलने पर प्रश्न–पत्र हल करने से पूर्व परीक्षार्थी यह सुनिश्चित कर लें कि :
- प्रश्न–पुस्तिका संख्या तथा ओ.एम.आर. उत्तर–पत्रक पर अंकित बारकोड संख्या समान है ।
- प्रश्न–पुस्तिका एवं ओ.एम.आर. उत्तर–पत्रक के सभी पृष्ठ व सभी प्रश्न सही मुद्रित हैं । समस्त प्रश्न, जैसा कि ऊपर वर्णित है, उपलब्ध हैं तथा कोई भी पृष्ठ कम नहीं है/ मुद्रण त्रुटि नहीं है ।

किसी भी प्रकार की विसंगति या दोषपूर्ण होने पर परीक्षार्थी वीक्षक से दूसरा प्रश्न–पत्र प्राप्त कर लें । यह सुनिश्चित करने की जिम्मेदारी स्वयं अभ्यर्थी की होगी । परीक्षा प्रारम्भ होने के 5 मिनट पश्चात् ऐसे किसी दावे/आपत्ति पर कोई विचार नहीं किया जायेगा ।

**On opening the paper seal/polythene bag of the Question Booklet before attempting the question paper, the candidate should ensure that :**
- **Question Booklet Number and Barcode Number of OMR Answer Sheet are same.**
- **All pages & Questions of Question Booklet and OMR Answer Sheet are properly printed. All questions as mentioned above are available and no page is missing/misprinted.**

**If there is any discrepancy/defect, candidate must obtain another Question Booklet from Invigilator. Candidate himself shall be responsible for ensuring this. No claim/objection in this regard will be entertained after five minutes of start of examination.**

## परीक्षार्थियों के लिए निर्देश

1. **प्रत्येक प्रश्न के लिये एक विकल्प भरना अनिवार्य है ।**
2. **सभी** प्रश्नों के अंक समान हैं ।
3. प्रत्येक प्रश्न का मात्र **एक** ही उत्तर दीजिए । एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा ।
4. **OMR** उत्तर-पत्रक इस प्रश्न-पुस्तिका के अन्दर रखा है । जब आपको प्रश्न-पुस्तिका खोलने को कहा जाए, तो उत्तर-पत्रक निकाल कर ध्यान से केवल **नीले बॉल पॉइंट पेन** से विवरण भरें ।
5. कृपया अपना रोल नम्बर ओ.एम.आर. उत्तर-पत्रक पर सावधानीपूर्वक सही भरें । गलत रोल नम्बर भरने पर परीक्षार्थी स्वयं उत्तरदायी होगा ।
6. **प्रत्येक गलत उत्तर के लिए प्रश्न अंक का 1/3 भाग काटा जायेगा** । गलत उत्तर से तात्पर्य अशुद्ध उत्तर अथवा किसी भी प्रश्न के एक से अधिक उत्तर से है ।
7. **प्रत्येक प्रश्न के पाँच विकल्प दिये गये हैं, जिन्हें क्रमशः 1, 2, 3, 4, 5 अंकित किया गया है । अभ्यर्थी को सही उत्तर निर्दिष्ट करते हुए उनमें से केवल एक गोले (बबल) को उत्तर-पत्रक पर नीले बॉल पॉइंट पेन से गहरा करना है ।**
8. **यदि आप प्रश्न का उत्तर नहीं देना चाहते हैं तो उत्तर-पत्रक में पाँचवें (5) विकल्प को गहरा करें । यदि पाँच में से कोई भी गोला गहरा नहीं किया जाता है, तो ऐसे प्रश्न के लिये प्रश्न अंक का 1/3 भाग काटा जायेगा ।**
9. * **प्रश्न-पत्र हल करने के उपरांत अभ्यर्थी अनिवार्य रूप से ओ.एम.आर. उत्तर-पत्रक जाँच लें कि समस्त प्रश्नों के लिये एक विकल्प (गोला) भर दिया गया है । इसके लिये ही निर्धारित समय से 10 मिनट का अतिरिक्त समय दिया गया है ।**
10. **यदि अभ्यर्थी 10% से अधिक प्रश्नों में पाँच विकल्पों में से कोई भी विकल्प अंकित नहीं करता है, तो उसको अयोग्य माना जायेगा ।**
11. मोबाइल फोन अथवा अन्य किसी इलेक्ट्रोनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित है । यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी ।

**चेतावनी :** अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराते हुए **राजस्थान सार्वजनिक परीक्षा (भर्ती में अनुचित साधनों की रोकथाम अध्युपाय) अधिनियम, 2022** तथा **अन्य प्रभावी कानून एवं आयोग के नियमों-प्रावधानों** के तहत कार्यवाही की जाएगी । साथ ही आयोग ऐसे अभ्यर्थी को भविष्य में होने वाली आयोग की समस्त परीक्षाओं से विवर्जित कर सकता है ।

## INSTRUCTIONS FOR CANDIDATES

1. **It is mandatory to fill one option for each question.**
2. **All** questions carry equal marks.
3. Only **one** answer is to be given for each question. If more than one answers are marked, it would be treated as wrong answer.
4. The **OMR** Answer Sheet is inside this Question Booklet. When you are directed to open the Question Booklet, take out the Answer Sheet and fill in the particulars carefully with **Blue Ball Point Pen** only.
5. Please correctly fill your Roll Number in **OMR** Answer Sheet. Candidate will themself be responsible for filling wrong Roll No.
6. **1/3 part of the mark(s) of each question will be deducted for each wrong answer.** A wrong answer means an incorrect answer or more than one answers for any question.
7. **Each question has five options marked as 1, 2, 3, 4, 5. You have to darken only one circle (bubble) indicating the correct answer on the Answer Sheet using BLUE BALL POINT PEN.**
8. **If you are not attempting a question then you have to darken the circle '5'. If none of the five circles is darkened, one third (1/3) part of the marks of question shall be deducted.**
9. * **After solving question paper, candidate must ascertain that he/she has darkened one of the circles (bubbles) for each of the questions. Extra time of 10 minutes beyond scheduled time, is provided for this.**
10. **A candidate who has not darkened any of the five circles in more than 10% questions, shall be disqualified.**
11. Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt as per rules.

**Warning :** If a candidate is found copying or if any unauthorized material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would liable to be prosecuted under **Rajasthan Public Examination (Measures for Prevention of Unfair Means in Recruitment) Act, 2022 & any other laws applicable and Commission's Rules-Regulations.** Commission may also debar him/her permanently from all future examinations.

उत्तर–पत्रक में दो प्रतियाँ हैं – मूल प्रति और कार्बन प्रति। परीक्षा समाप्ति पर परीक्षा कक्ष छोड़ने से पूर्व परीक्षार्थी उत्तर–पत्रक की दोनों प्रतियाँ वीक्षक को सौंपेंगे, परीक्षार्थी स्वयं कार्बन प्रति अलग नहीं करें । वीक्षक उत्तर–पत्रक की मूल प्रति को अपने पास जमा कर, कार्बन प्रति को मूल प्रति से कट लाइन से मोड़ कर सावधानीपूर्वक अलग कर परीक्षार्थी को सौंपेंगे, जिसे परीक्षार्थी अपने साथ ले जायेंगे । परीक्षार्थी को उत्तर–पत्रक की कार्बन प्रति चयन प्रक्रिया पूर्ण होने तक सुरक्षित रखनी होगी एवं आयोग द्वारा माँगे जाने पर प्रस्तुत करनी होगी ।

1. ब्रह्मादित्यसम्प्रदाययोः सम्बद्धः वेद विशेषः कः ?

(1) ऋग्वेदः (2) सामवेदः

(3) यजुर्वेदः (4) अथर्ववेदः

(5) अनुत्तरित प्रश्न

2. कल्पसूत्रं कतिविधं वर्तते ?

(1) द्विविधम् (2) त्रिविधम्

(3) चतुर्विधम् (4) पञ्चविधम्

(5) अनुत्तरित प्रश्न

3. स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते, तद् वेदाङ्गम् अस्ति –

(1) निरुक्तम् (2) कल्पम्

(3) व्याकरणम् (4) शिक्षा

(5) अनुत्तरित प्रश्न

4. "मन्त्रब्राह्मणयोर्वेदनामधेयम्" कस्येयमुक्तिः ?

(1) आपस्तम्बस्य (2) सायणस्य

(3) यास्कस्य (4) कुमारिलस्य

(5) अनुत्तरित प्रश्न

5. षोडशसंस्कारविधिः कस्मिन् कल्पसूत्रे प्राप्यते ?

(1) शुल्वसूत्रे (2) धर्मसूत्रे

(3) गृह्यसूत्रे (4) श्रौतसूत्रे

(5) अनुत्तरित प्रश्न

6. संहिताया विकृतिस्वरूपाः पाठभेदाः कति सन्ति ?

(1) अष्टौ (2) अष्टादश

(3) पञ्च (4) सप्त

(5) अनुत्तरित प्रश्न

7. अथर्ववेदेन संबद्धो ब्राह्मणः

(1) शतपथब्राह्मणः (2) ऐतेरयब्राह्मणः

(3) तैत्तिरीयब्राह्मणः (4) गोपथब्राह्मणः

(5) अनुत्तरित प्रश्न

8. "चत्वारिपदजातानि नामाख्याते चोपसर्ग निपाताश्च" कस्याः उक्तिरियम् ?

(1) यास्कस्य (2) पाणिनेः

(3) शाकटायनस्य (4) पतञ्जलेः

(5) अनुत्तरित प्रश्न

9. यास्कमते अग्नेः निर्वचनं नास्ति

(1) अंगं नयति

(2) अग्रे नयति

(3) अग्रणीः भवति

(4) अग्रं यज्ञेषु प्रणीयते

(5) अनुत्तरित प्रश्न

10. अग्निविद्याविवेचकः उपनिषद्विशेषः कः ?

(1) छान्दोग्योपनिषद्

(2) ईशावास्योपनिषद्

(3) कठोपनिषद्

(4) मुण्डकोपनिषद्

(5) अनुत्तरित प्रश्न

11. 'अरण्याध्ययनादेतद् आरण्यकम्' इति कस्येयमुक्तिः ?

(1) यास्कस्य (2) पाणिनेः

(3) शंकरस्य (4) सायणस्य

(5) अनुत्तरित प्रश्न

12. "हिरण्ययेन पात्रेण सत्यस्यापिहितं मुखम्" इति मन्त्रः कस्यामुपनिषदि वर्तते ?

(1) कठोपनिषदि

(2) केनोपनिषदि

(3) ईशावास्योपनिषदि

(4) प्रश्नोपनिषदि

(5) अनुत्तरित प्रश्न

13. 'शिक्षावल्ली' कस्यामुपनिषदि ?

(1) ईशावास्योपनिषदि

(2) छान्दोग्योपनिषदि

(3) केनोपनिषदि

(4) तैत्तिरीयोपनिषदि

(5) अनुत्तरित प्रश्न

14. "अनन्दा नाम ते लोकास्तान् स गच्छति ता ददत् ।" इत्यत्र "ता" इति पदेन किं कथितम् ?

(1) धनानि (2) धान्यानि

(3) गाः (4) पशवः

(5) अनुत्तरित प्रश्न

15. तैत्तिरीयशाखासम्बद्धः वेदविशेषः कः ?

(1) शुक्लयजुर्वेदः (2) सामवेदः

(3) कृष्णयजुर्वेदः (4) अथर्ववेदः

(5) अनुत्तरित प्रश्न

16. ज्ञानकर्मोपासनात्मकोपनिषद्विशेषः कः ?

(1) ईशावास्योपनिषद्

(2) कठोपनिषद्

(3) प्रश्नोपनिषद्

(4) बृहदारण्यकोपनिषद्

(5) अनुत्तरित प्रश्न

17. वेदाङ्गानि कति ?

(1) त्रीणि (2) चत्वारि

(3) पञ्च (4) षट्

(5) अनुत्तरित प्रश्न

18. ऐतरेयब्राह्मणसम्बद्धः वेदविशेषः कः ?

(1) अथर्ववेदः (2) यजुर्वेदः

(3) ऋग्वेदः (4) सामवेदः

(5) अनुत्तरित प्रश्न

19. श्रेयो मार्गः प्रेयो मार्गश्च कस्यामुपनिषदि ?

(1) तैत्तिरीयोपनिषदि

(2) कठोपनिषदि

(3) प्रश्नोपनिषदि

(4) ईशावास्योपनिषदि

(5) अनुत्तरित प्रश्न

20. "शुनः शेप" आख्यानं कस्मिन् ब्राह्मणे वर्णितमस्ति ?

(1) ऐतरेयब्राह्मणे (2) शतपथब्राह्मणे

(3) ताण्ड्यब्राह्मणे (4) वंशब्राह्मणे

(5) अनुत्तरित प्रश्न

21. ऋग्वेदस्य का शाखा सम्प्रति समुपलभ्यते ?

(1) शांखायनशाखा

(2) आश्वलायनशाखा

(3) बाष्कलशाखा

(4) शाकलशाखा

(5) अनुत्तरित प्रश्न

22. शतपथब्राह्मणस्य रचयिता कः अस्ति ?

(1) भृगुः (2) अङ्गिराः

(3) जैमिनिः (4) याज्ञवल्क्यः

(5) अनुत्तरित प्रश्न

23. 'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तम्' तत् किमुच्यते ?

(1) निरुक्तम् (2) व्याकरणम्
(3) गृह्यसूत्रम् (4) ज्योतिषम्
(5) अनुत्तरित प्रश्न

24. छन्दोवेदाङ्गस्य प्रतिनिधिग्रन्थः 'छन्दःसूत्रम्' केन प्रणीतम् ?

(1) पिंगलेन (2) शाकल्येन
(3) लगधेन (4) वराहमिहिरेण
(5) अनुत्तरित प्रश्न

25. निरुक्तानुसारेण भावप्रधानम् किम् ?

(1) आख्यातम् (2) जातिः
(3) उपसर्गः (4) निपातम्
(5) अनुत्तरित प्रश्न

26. सांख्यदर्शनानुसारं सांख्यकारिकायां तत्त्वानां संख्या कति कथिता ?

(1) षट् (2) सप्त
(3) एकविंशतिः (4) पञ्चविंशतिः
(5) अनुत्तरित प्रश्न

27. सांख्यकारिकानुसारि – प्रत्ययसर्गस्य कोऽर्थः ?

(1) प्रत्ययोबुद्धिः, तस्य सर्गः सृष्टिः
(2) प्रत्ययोमनः, तस्य सर्गः कार्यम्
(3) प्रत्ययः संसारः, तस्य सर्गः उत्पत्तिः
(4) प्रत्ययोऽहङ्कारः, तस्य सर्गः कार्यम्
(5) अनुत्तरित प्रश्न

28. श्रोतरूपेण प्रतिष्ठितं वेदाङ्गम् अस्ति

(1) व्याकरणम् (2) निरुक्तम्
(3) शिक्षा (4) ज्योतिषम्
(5) अनुत्तरित प्रश्न

29. सांख्यकारिकायां 'संघात परार्थत्वात्' अनेन हेतुना साध्यते

(1) अव्यक्तम् (2) अहङ्कारः
(3) पुरुषः (4) महत्
(5) अनुत्तरित प्रश्न

30. सांख्यकारिकानुसारं सृष्टेरुत्पत्तिः कस्माद् भवति ?

(1) पृथिव्याः
(2) प्रकृति-पुरुष – संयोगात्
(3) अद्भ्यः
(4) वायोः
(5) अनुत्तरित प्रश्न

31. सांख्यकारिकानुसारं करणं कतिविधम् ?

(1) षोडश (2) चतुर्दश
(3) सप्तदश (4) त्रयोदश
(5) अनुत्तरित प्रश्न

32. वेदान्तदर्शनानुसारेण अज्ञानं भवति –

(1) अभावरूपम्
(2) त्रिगुणात्मकम्
(3) सदसद्भ्यां निर्वचनीयम्
(4) असद्रूपम्
(5) अनुत्तरित प्रश्न

33. "दुःखत्रयाभिघाताज्जिज्ञासा तदभि घातके हेतौ" इति कुत्र वर्णितमस्ति ?

(1) सांख्यकारिकायाम्
(2) वेदान्तसारे
(3) ब्रह्मसूत्रे
(4) योगदर्शने
(5) अनुत्तरित प्रश्न

34. वेदान्तसारानुसारं "सगुणब्रह्मविषयकमानसव्यापाररूपाणि" कर्माणि कानि भवन्ति ?

(1) काम्यकर्माणि (2) नित्यकर्माणि

(3) उपासनाकर्माणि (4) साध्यकर्माणि

(5) अनुत्तरित प्रश्न

35. वेदान्तसारानुसारं "नित्यनैमित्तिक प्रायश्चित्तोपासनानाम् अवान्तरफलम्" किम् ?

(1) भौतिकसुख प्राप्तिः

(2) पितृलोकसत्यलोकप्राप्तिः

(3) शरीर शुद्धिः

(4) सत्ख्यातिः

(5) अनुत्तरित प्रश्न

36. वेदान्तसारानुसारं लिङ्गशरीरे कस्य गणना न भवति ?

(1) बुद्धेः (2) मनसः

(3) प्राणवायोः (4) आकाशस्य

(5) अनुत्तरित प्रश्न

37. सांख्यदर्शनानुसारं प्रमाणानां संख्या अस्ति

(1) द्वे (2) त्रीणि

(3) चत्वारि (4) षड्

(5) अनुत्तरित प्रश्न

38. "______ अधिकारि-विषय-सम्बन्ध-प्रयोजनानि" इति रूपेण वेदान्ते व्याख्यायितम्

(1) वेदचतुष्टयम् (2) पुरुषार्थचतुष्टयम्

(3) भावचतुष्टयम् (4) अनुबन्धचतुष्टयम्

(5) अनुत्तरित प्रश्न

39. वेदान्तसारानुसारम् अज्ञानशक्तिः कतिविधा ?

(1) चतुर्विधा (2) पञ्चविधा

(3) द्विविधा (4) षड्विधा

(5) अनुत्तरित प्रश्न

40. वेदान्तसारग्रन्थस्य कर्त्ता कः ?

(1) ईश्वरकृष्णः (2) सदानन्दः

(3) सुरेश्वरः (4) शंकराचार्यः

(5) अनुत्तरित प्रश्न

41. तर्कभाषानुसारेण प्रमायाः करणं किम्भवति ?

(1) प्रमाता (2) प्रमाणम्

(3) तर्कः (4) इन्द्रि संयोगादिः

(5) अनुत्तरित प्रश्न

42. तर्कभाषानुसारं ज्ञातविषयं ज्ञानम् अस्ति ?

(1) अनुभवः (2) तर्कः

(3) स्मृतिः (4) प्रमाणम्

(5) अनुत्तरित प्रश्न

43. तर्कभाषाकारेण इन्द्रियार्थसन्निकर्षः कतिविधः प्रकीर्तितः ?

(1) षड्विधः (2) अष्टविधः

(3) नवविधः (4) दशविधः

(5) अनुत्तरित प्रश्न

44. "यस्य कार्यात् पूर्वभावो नियतोऽनन्यथासिद्धश्च तत् किम् ?"

(1) कार्यम् (2) कारणम्

(3) विभावम् (4) पञ्चीकरणम्

(5) अनुत्तरित प्रश्न

45. वेदान्तसारानुसारं तितिक्षायाः किं लक्षणम् ?

(1) विहितानां कर्मणां विधिना परित्यागः

(2) मोक्षेच्छा

(3) जन्ममरण बन्धनात् मुक्तिः

(4) शीतोष्णादिद्वन्द्व सहिष्णुता

(5) अनुत्तरित प्रश्न

46. तर्कभाषायाः रचनाकारः कोऽस्ति ?

(1) अन्नंभट्टः (2) सदानन्दः

(3) केशवमिश्रः (4) सर्वे एते

(5) अनुत्तरित प्रश्न

47. केशवमिश्रानुसारं पदार्थस्य कति प्रकाराः सन्ति ?

(1) पञ्च (2) षोडश

(3) सप्त (4) अष्ट

(5) अनुत्तरित प्रश्न

48. तर्कभाषानुसारम् उपमानलक्षणम् किमस्ति -

(1) आप्तवाक्यम्

(2) अतिदेशवाक्यार्थस्मरणसहकृतं गोसादृश्य-विशिष्टपिण्डज्ञानम्

(3) लिङ्ग परामर्शः

(4) इन्द्रियार्थ सन्निकर्षोत्पन्नं ज्ञानम्

(5) अनुत्तरित प्रश्न

49. "यागादिरेव धर्मः" कस्येयमुक्तिः ?

(1) लौगाक्षिभास्करस्य

(2) केशवमिश्रस्य

(3) ईश्वरकृष्णस्य

(4) कपिलमुनेः

(5) अनुत्तरित प्रश्न

50. तर्कभाषाकारेण प्रमायाः लक्षणं किमुक्तम् ?

(1) प्रमाकरणम्

(2) यथार्थानुभवः

(3) मिथ्याज्ञानमतद्रूपप्रतिष्ठम्

(4) तदभाववति तत्प्रकारम्

(5) अनुत्तरित प्रश्न

51. "वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः" इति धर्मलक्षणे 'वेद प्रतिपाद्यः' इति पदं किमर्थं गृहीतम् ?

(1) द्यूतक्रीडादावतिव्याप्तिवारणाय

(2) स्वर्गादिप्रयोजनेऽतिव्याप्तिवारणाय

(3) श्येनयागादावतिव्याप्तिवारणाय

(4) भोजनादावतिव्याप्तिवारणाय

(5) अनुत्तरित प्रश्न

52. अर्थसंग्रहानुसारं विधिश्चतुर्विधः – उत्पत्तिविधिः, विनियोगविधिः, अधिकारविधिः ______ च । – अत्र रिक्तस्थानं पूरयत ।

(1) नियमविधिः (2) प्रयोगविधिः

(3) यज्ञविधिः (4) परिसमूहनविधिः

(5) अनुत्तरित प्रश्न

53. अर्थसंग्रहानुसारम् "अज्ञातार्थज्ञापको वेदभागः ______" किमुच्यते ।

(1) विधिः (2) विधानम्

(3) विज्ञानम् (4) विशेषम्

(5) अनुत्तरित श्न

54. अर्थसंग्रहरीत्या शाब्दीभावनायाः लक्षणं किम् ?

(1) प्रयोजनेच्छाजनित क्रिया विषय व्यापारविशेषः

(2) पुरुषप्रवृत्यनुकूलो भावयितुर्व्यापारविशेषः

(3) भवितुर्भवनानुकूलो भाव व्यापारविशेषः

(4) भवितुर्भावनानुकूलो भावयितुर्व्यापारविशेषः

(5) अनुत्तरित प्रश्न

55. अर्थसंग्रहे विशिष्ट विधेः उदाहरणमस्ति –

(1) दध्नाजुहोति

(2) अग्निहोत्रं जुहुयात्स्वर्गकामः

(3) सोमेन यजेत

(4) राजा राजसूयेन स्वराज्यकामो यजेत

(5) अनुत्तरित प्रश्न

56. पतंजलिमतेन चित्तवृत्तीनां निरोधः किमुच्यते ?

(1) कर्म (2) योगः

(3) धर्मः (4) वैराग्यम्

(5) अनुत्तरित प्रश्न

57. पातंजलयोगसूत्र – रीत्या योगाङ्गानि कति सन्ति ?

(1) अष्टौ (2) पञ्च

(3) दश (4) नव

(5) अनुत्तरित प्रश्न

58. पतंजलिमतेन समाधिः कतिविधः ?

(1) त्रिविधः (2) पञ्चविधः

(3) द्विविधः (4) सप्तविधः

(5) अनुत्तरित प्रश्न

59. चित्तभूमिषु इयन्नास्ति ?

(1) क्षिप्तम् (2) मूढम्

(3) विमूढम् (4) विक्षिप्तम्

(5) अनुत्तरित प्रश्न

60. अर्थवादस्य लक्षणं किम् ?

(1) प्राशस्त्य निन्दान्यतरपरं वाक्यम्

(2) अपौरुषेयं वाक्यम्

(3) अङ्गप्रधानसम्बन्ध वाक्यम्

(4) पौरुषेयं वाक्यम्

(5) अनुत्तरित प्रश्न

61. "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः" इति योगसूत्रानुसारं कः लक्षितः ?

(1) पुरुषः (2) संवेगः

(3) प्रज्ञा (4) ईश्वरः

(5) अनुत्तरित प्रश्न

62. योगसूत्रानुसारं "प्रणवः" इति शब्दः कस्य वाचको वर्तते ?

(1) योगस्य (2) ईश्वरस्य

(3) ज्ञानस्य (4) शिवस्य

(5) अनुत्तरित प्रश्न

63. "यमनियमासनप्राणायामप्रत्याहारधारणाध्यान – समाधयोऽष्टावङ्गानि" इत्येतान्यष्टौ अङ्गानि पतञ्जलिना कस्य विषये कथितानि ?

(1) योगस्य (2) समाधेः

(3) ईश्वरस्य (4) प्रमाणस्य

(5) अनुत्तरित प्रश्न

64. "तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव ______" इत्यनेन योगसूत्रकारेण कस्य लक्षणं प्रोक्तम् ?

(1) कैवल्यस्य (2) चित्तभूमेः

(3) समाधेः (4) प्राणायामस्य

(5) अनुत्तरित प्रश्न

65. "प्रमाण – विपर्यय – विकल्प – निद्रा – स्मृतयः" इति योगसूत्रे कस्याः पञ्च प्रकाराणि उल्लिखिइतानि ?

(1) भूमेः (2) समाधेः

(3) वृत्तेः (4) क्षितेः

(5) अनुत्तरित प्रश्न

66. जैनदर्शनमते आस्रवनिरोधो भवति -

(1) बन्धः (2) संवरः

(3) निर्जरः (4) जीवः

(5) अनुत्तरित प्रश्न

67. चार्वाकस्य सिद्धान्तः कः ?

(1) देहात्मवादः (2) प्रकृतिवादः

(3) असत्कार्यवादः (4) शून्यवादः

(5) अनुत्तरित प्रश्न

68. सम्यग्-दर्शन-ज्ञान चरित्राणि जैनदर्शने किं प्रोक्तम् ?

(1) कर्म-मार्गः (2) ज्ञान-मार्गः

(3) मोक्ष मार्गः (4) प्रत्यवाय मार्गः

(5) अनुत्तरित प्रश्न

69. बौद्धमते अर्थक्रियाकारित्वं कस्य लक्षणम् ?

(1) गुणस्य (2) सत्त्वस्य

(3) समवायस्य (4) अभावस्य

(5) अनुत्तरित प्रश्न

70. बौद्धमते दुःखसमुदायनिरोधमार्गाः कति ?

(1) त्रयः (2) चत्वारः

(3) षट् (4) अष्टौ

(5) अनुत्तरित प्रश्न

71. चार्वाकदर्शनस्य कृते किम् अपरनाम प्रचलितमस्ति ?

(1) ब्रह्मदर्शनम् (2) परलोकदर्शनम्

(3) आस्तिकदर्शनम् (4) लोकायतम्

(5) अनुत्तरित प्रश्न

72. "रक्षोहागमलघ्वसन्देहाः" इत्यनेन महाभाष्ये किं कथितम् ?

(1) व्याकरणस्य हेतुः

(2) व्याकरणाध्ययनस्य प्रयोजनम्

(3) व्याकरणस्य लक्षणम्

(4) व्याकरणस्य स्वरूपम्

(5) अनुत्तरित प्रश्न

73. महाभाष्यकारेण प्रदत्तं व्याकरणलक्षणमस्ति -

(1) "चत्वारि वाक् परिमिता पदानि" इति

(2) "दुष्टः शब्दः स्वरतो वर्णतो वा" इति

(3) "शब्दान् यथावद् व्यवहारकाले" इति

(4) "लक्ष्यलक्षणे" इति

(5) अनुत्तरित प्रश्न

74. 'सिद्धे शब्दार्थसम्बन्धे' इत्यत्र महाभाष्ये 'सिद्ध' शब्दस्य कः पर्यायः ?

(1) अनित्यः (2) व्यापकः

(3) नित्यः (4) पक्वम्

(5) अनुत्तरित प्रश्न

75. महाभाष्य - पस्पशाह्निके 'व्याख्यानम्' कीदृशं प्रोक्तम् ?

(1) केवलानि चर्चापदानि

(2) उदाहरणं, प्रत्युदाहरणं, वाक्याध्याहार - इत्येतत् समुदितम्

(3) उदाहरणमेव

(4) प्रत्युदाहरणमेव

(5) अनुत्तरित प्रश्न

76. "येनोच्चारितेन सास्नालांगूलककुदखुरविषाणिनां सम्प्रत्यो भवति सः ___" अत्र रिक्तस्थानं पूरयत ।

(1) शब्दः (2) अर्थः

(3) भावः (4) सिद्धः

(5) अनुत्तरित प्रश्न

77. 'अध्यात्मम्' इति पदे कः समासः ?

(1) अव्ययीभावः (2) तत्पुरुषः

(3) बहुव्रीहिः (4) द्विगुः

(5) अनुत्तरित प्रश्न

78. "कर्तृकरणे कृता बहुलम्" इति सूत्रेण सिद्धं समस्तपदं भवति ______

(1) शङ्कुलाखण्डः (2) धान्यार्थः

(3) ग्रामगतः (4) हरित्रातः

(5) अनुत्तरित प्रश्न

79. "शिवकेशवौ" इत्यस्मिन् समस्तपदे शिवस्य पूर्वप्रयोग विधायकं सूत्रमस्ति -

(1) द्वन्द्वे घिः (2) अजाद्यदन्तम्

(3) अल्पाच्तरम् (4) राजदन्तादिषु परम्

(5) अनुत्तरित प्रश्न

80. 'अतो दीर्घो यञि' इति सूत्रस्य उचितम् उदाहरणम् अस्ति -

(1) भविता (2) भवामि

(3) भवताम् (4) भवि तासि

(5) अनुत्तरित प्रश्न

81. "लिटि धातोरनभ्यासस्य" इति सूत्रेण विधानं भवति

(1) अभ्यासस्य लोपः (2) द्वित्वम्

(3) दीर्घः (4) शपप्रत्यय :

(5) अनुत्तरित प्रश्न

82. "वागर्थाविव" इत्यत्र कः समासः ?

(1) केवलसमासः (2) द्विगुसमासः

(3) कर्मधारयसमासः (4) द्वन्द्वसमासः

(5) अनुत्तरित प्रश्न

83. "एधाञ्चक्रे" इति एध धातोः पदरूपमस्ति -

(1) लिटि – प्रथमपुरुषः – एकवचनम्

(2) लोटि – मध्यमपुरुषः – एकवचनम्

(3) लृटि – प्रथमपुरुषः – एकवचनम्

(4) लृटि – उत्तमपुरुषः – बहुवचनम्

(5) अनुत्तरित प्रश्न

84. "एजेः खश्" इति सूत्रेण सिद्धस्य पदस्य उदाहरणमस्ति -

(1) प्रियंवदः (2) वशंवदः

(3) जनमेजयः (4) सुशर्मा

(5) अनुत्तरित प्रश्न

85. "पोरदुपधात्" इति सूत्रेण कस्य प्रत्ययस्य विधानं क्रियते ?

(1) यत् – प्रत्ययस्य (2) अत् – प्रत्ययस्य

(3) उप् – प्रत्ययस्य (4) पुक् – प्रत्ययस्य

(5) अनुत्तरित प्रश्न

86. "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" इति सूत्रेण विधाने कृते 'फक्' प्रत्ययान्तम् पदम् अस्ति

(1) दाक्षायणः (2) गार्ग्यः

(3) वात्स्यः (4) आदित्यः

(5) अनुत्तरित प्रश्न

87. "लिटस्तझयोरेशिरेच्" इति सूत्रस्योदाहरणम् स्यात्

(1) एधाम्बभूव (2) एधाञ्चक्रिरे

(3) एधाञ्चकृमहे (4) एधामास

(5) अनुत्तरित प्रश्न

88. "षिद्गौरादिभ्यश्च" इति सूत्रेण कस्य स्त्रीप्रत्ययस्य विधानं भवति ?

(1) ङीप् – प्रत्ययस्य (2) ङीष् – प्रत्ययस्य

(3) डाप् – प्रत्ययस्य (4) ति – प्रत्ययस्य

(5) अनुत्तरित प्रश्न

89. 'टिड्ढाणञ्' इत्यादि सूत्रेण 'क्वरप्' प्रत्ययान्ताद् ङीप उदाहरणं कीदृशमस्ति ?

(1) इत्वरी (2) यादृशी

(3) लावणिकी (4) आक्षिकी

(5) अनुत्तरित प्रश्न

90. 'तुल्यास्यप्रयत्नम्' इत्यादि सूत्रेण का सञ्ज्ञा विधीयते ?

(1) अनुनासिकसंज्ञा (2) प्रत्याहारसंज्ञा

(3) सवर्णसंज्ञा (4) सन्निकर्षसंज्ञा

(5) अनुत्तरित प्रश्न

91. "कृत्तद्धितसमासाश्च" इत्यनेन का संज्ञा विधीयते ?

(1) नदीसंज्ञा (2) प्रातिपदिकसंज्ञा

(3) सर्वनामसंज्ञा (4) गतिसंज्ञा

(5) अनुत्तरित प्रश्न

92. "तदस्यास्त्यस्मिन्निति मतुप्" इति सूत्रस्योदाहरणम् अस्ति

(1) विदुष्मान् (2) दन्तुरः

(3) मेधावी (4) केशवः

(5) अनुत्तरित प्रश्न

93. 'प्रगृह्य' संज्ञकं भवति

(1) सुप्तिङन्तम्

(2) यू-स्त्र्याख्यौ

(3) क्त-क्तवतू

(4) ईदूदेद् – द्विवचनम्

(5) अनुत्तरित प्रश्न

94. 'प्रातिपदिकार्थलिङ्ग परिमाणवचनमात्रे प्रथमा' इति सूत्रेण प्रातिपदिकार्थमात्रे प्रथमाया उदाहरणं किमस्ति ?

(1) तटः (2) एकः

(3) उच्चैः (4) द्रोणो व्रीहिः

(5) अनुत्तरित प्रश्न

95. कस्य ईप्सिततमस्य कर्मसंज्ञा विधीयते ?

(1) कर्तुः (2) कर्मणः

(3) करणस्य (4) सम्प्रदानस्य

(5) अनुत्तरित प्रश्न

96. "कर्तृकरणयोस्तृतीया" इति कारकनियमेन शुद्धं वाक्यम् अस्ति ?

(1) रामेण सह सीताऽपि वनम् अगच्छत् ।

(2) जटाभिस्तापसः ज्ञायते ।

(3) कृष्णेन सुदर्शनचक्रेण हतः शिशुपालः ।

(4) देवः अध्ययनेन वसति ।

(5) अनुत्तरित प्रश्न

97. गुणसंज्ञायाः परिभाषा अस्ति

(1) आद्गुणः (2) ओर्गुणः

(3) गुणोऽपृक्ते (4) अदेङ्गुणः

(5) अनुत्तरित प्रश्न

98. 'उपाध्यायाद् अधीते' इत्यत्र अपादानसंज्ञाविधायकः नियमः कः ?

(1) जनिकर्तुः प्रकृतिः (2) भुवः प्रभवः

(3) पराजेरसोढः (4) आख्यातोपयोगे

(5) अनुत्तरित प्रश्न

99. "रामे गते दशरथः दिवङ्गतः" इति वाक्यनिर्धारणे सूत्रस्य विधानमस्ति –

(1) यतश्च निर्धारणम्

(2) यस्य च भावेन भावलक्षणम्

(3) साध्वसाधु प्रयोगे

(4) कृत्यानां कर्तरि वा

(5) अनुत्तरित प्रश्न

100. 'स्वीट' मतेन भाषा परिभाषिता अस्ति –

(1) ध्वन्यात्मकशब्दैः विचाराणां प्रकटीकरणम् ।

(2) भाषाशब्दः संस्कृतस्य वद्धातोः निष्पन्नः ।

(3) विचाराणां ध्वनिस्वरूपेण ओष्ठयोः प्रकटीकरणम् ।

(4) भाषा संकेत रूपैव ।

(5) अनुत्तरित प्रश्न

101. भाषाविज्ञान रीत्या वाचः सत्ता मन्यते –

(1) मानसिकी (2) अमूर्ता

(3) व्यक्ति निरपेक्षा (4) भौतिकी

(5) अनुत्तरित प्रश्न

102. रुच्यर्थानां धातूनां प्रयोगे कस्य सम्प्रदानसंज्ञास्यात् ?

(1) ज्ञीप्स्यमानस्य (2) प्रीयमाणस्य

(3) प्राप्तस्य (4) करणीयस्य

(5) अनुत्तरित प्रश्न

103. पुर्तगाली – भाषा – परिवारोऽस्ति –

(1) भारोपीयः (2) बुशमैनः

(3) अमरीकी (4) सूडानः

(5) अनुत्तरित प्रश्न

104. "सतम्" वर्गान्तर्गता भाषा अस्ति –

(1) डेनिश (2) स्वीडिश

(3) संस्कृतम् (4) इतालवी

(5) अनुत्तरित प्रश्न

105. मागधी प्राकृतस्य मूलस्थानं मन्यते

(1) मगध समीपे (2) मथुरा समीपे

(3) गुर्जर प्रदेशः (4) महाराष्ट्रम्

(5) अनुत्तरित प्रश्न

106. संघर्षी व्यञ्जनं विधते

(1) छ (2) ञ

(3) ल (4) स

(5) अनुत्तरित प्रश्न

107. आदिव्यञ्जनलोपस्य उदाहरणम् अस्ति –

(1) नाज (2) ग्यारह

(3) थाली (4) कोयल

(5) अनुत्तरित प्रश्न

108. योगात्मक भाषासु भवति –

(1) सम्बन्ध तत्त्वस्य अर्थतत्त्वस्य च योगः

(2) स्वरस्य प्राधान्यम् ।

(3) निपातस्य प्राधान्यम् ।

(4) स्थानस्य प्रधानता

(5) अनुत्तरित प्रश्न

109. 'तुमुन्' अर्थे वैदिकप्रत्ययः प्रयुज्यते –

(1) थन (2) असे

(3) ल्यप् (4) क्त्वा

(5) अनुत्तरित प्रश्न

110. "त्रिमूर्धः" इति पदे समासान्त-प्रत्ययोऽस्ति –

(1) षच् । (2) षः ।

(3) अच् । (4) टच् ।

(5) अनुत्तरित प्रश्न

111. ङितो लस्य परस्मैपदमिकारान्तं यत्तदन्तस्य लोपविधायकं सूत्रम् –

(1) इतश्च (2) अदन्तस्य लोपः

(3) अलोऽन्त्यस्य (4) इटोऽत्

(5) अनुत्तरित प्रश्न

112. 'भूयात्' इत्यत्र गुणप्रतिषेधकं सूत्रम् अस्ति –

(1) इको गुणवृद्धी

(2) न धातुलोपे आर्धधातुकम्

(3) किदाशिषि

(4) क्ङिति च

(5) अनुत्तरित प्रश्न

113. संस्कृतस्य "भृ" धातोः "बिभर्ति" इति रूपं भवति । – अत्र कीदृशो ध्वनि नियमः प्रवर्तते ?

(1) ग्रेसमैननियमः (2) वर्नरनियमः

(3) तालव्यनियमः (4) ग्रिमनियमः

(5) अनुत्तरित प्रश्न

114. सम्यक् मेलयत –

(i) एधाश्चकृढ्वे A. लृङ्लकार - प्रथमपुरुषैकवचनम् ।

(ii) एधिताहे B. विधिलिङ् - उत्तमपुरुषद्विवचनम् ।

(iii) एधेवहि C. लृट्लकार - उत्तमपुरुषैकवचनम् ।

(iv) ऐधिष्यत D. लिट्लकार – मध्मयपुरुषबहुवचनम् ।

| | (i) | (ii) | (iii) | (iv) |
|---|---|---|---|---|
| (1) | A | B | C | D |
| (2) | A | C | B | D |
| (3) | D | C | B | A |
| (4) | D | B | A | C |

(5) अनुत्तरित प्रश्न

115. 'शिष्यः' इति पदे शास् धातोः उपधायाः इत् – विधायकं सूत्रम्

(1) इदुद्भ्याम्

(2) इदितो नुम् धातोः

(3) शास इदङ्हलोः

(4) इतश्च

(5) अनुत्तरित प्रश्न

116. 'एधिताध्वे' इत्यत्र तासः सलोपविधायकं सूत्रम् अस्ति –

(1) तासस्त्योर्लोपः

(2) सस्यलोपः सार्वधातुके

(3) धि च

(4) लिङः सलोपोऽनन्त्यस्य

(5) अनुत्तरित प्रश्न

[redacted]

117. 'जनमेजयः इत्यत्र शप आगमो भवति' –
(1) उपपदत्वात् (2) नुभागमाद्
(3) शित्वाद् (4) प्रयोजनवशाद्
(5) अनुत्तरित प्रश्न

118. सूत्रोदाहरणानि सम्यक् मेलयत –
(i) उच्छूनः A. क्षायो मः
(ii) पक्वः B. ल्वादिभ्यश्च
(iii) क्षामः C. ओदितश्च
(iv) लूनः D. पयो वः

| | (i) | (ii) | (iii) | (iv) |
|---|---|---|---|---|
| (1) | C | D | A | B |
| (2) | C | D | B | A |
| (3) | D | C | B | A |
| (4) | D | C | A | B |

(5) अनुत्तरित प्रश्न

119. 'सत्' संज्ञकौ प्रत्ययौ स्तः
(1) लट्लोटौ । (2) क्तक्तवतू ।
(3) ण्वुल्तृचौ । (4) शतृशानचौ ।
(5) अनुत्तरित प्रश्न

120. "लोपो व्योर्वलि" इति सूत्रेण अधोलिखितौ सिद्ध्येते
(1) भवेत् – भवेताम्
(2) अभवत् – अभवताम्
(3) भवतु – भवताम्
(4) भूयात् – भूयास्ताम्
(5) अनुत्तरित प्रश्न

121. "मृज्यः" इति पदे प्रत्ययः अस्ति –
(1) ण्यत् (2) क्यप्
(3) यत् (4) तृच्
(5) अनुत्तरित प्रश्न

122. समासप्रकरणे "झयः" इति सूत्रेण "टच्" प्रत्ययान्तस्योदाहरणम् अस्ति –
(1) उपसमिधम् (2) उपराजम्
(3) द्वियमुनम् (4) अनुज्येष्ठम्
(5) अनुत्तरित प्रश्न

123. "शत्रून् स्वर्गम् अगमयत्" इति णिजन्तावस्थायाः वाक्यस्य अण्यन्तावस्थायां वाक्यम् अस्ति –
(1) अगच्छ शत्रून् स्वर्गम्
(2) शत्रुः स्वर्गं गच्छेत्
(3) शत्रव ! गच्छत स्वर्गम्
(4) शत्रवः स्वर्गम् अगच्छन्
(5) अनुत्तरित प्रश्न

124. व्यूढोरस्कः इत्यत्र कीदृशः समास ?
(1) अव्ययीभावः (2) तत्पुरुषः
(3) द्वन्द्वः (4) बहुव्रीहिः
(5) अनुत्तरित प्रश्न

125. 'एध-वृद्धौ' इत्यस्माद् धातोः 'ऐधिष्ट' इति रूपं निष्पद्यते –
(1) विधिलिङ्लकारे (2) लुङ्लकारे
(3) लट्लकारे (4) लङ्लकारे
(5) अनुत्तरित प्रश्न

126. 'अतिनिद्रम्' इत्यत्र कस्मिन् अर्थे समासः ?
(1) विभक्त्यर्थे (2) पश्चादर्थे
(3) असम्प्रत्यर्थे (4) वीप्सार्थे
(5) अनुत्तरित प्रश्न

127. पुरुष सूक्तस्य ऋग्वैदिक मण्डलक्रमः कः ?

(1) 10/10 (2) 10/121
(3) 10/95 (4) 10/90
(5) अनुत्तरित प्रश्न

128. 'नासदीय' सूक्तस्य ऋषिः कः अस्ति ?

(1) विश्वामित्रः (2) जमदग्निः
(3) परमेष्ठी प्रजापतिः (4) वसिष्ठः
(5) अनुत्तरित प्रश्न

129. 'माता भूमिः पुत्रो अहं पृथिव्याः' उक्तिरियं कस्मिन् सूक्ते वर्णिता ?

(1) वाक्सूक्ते (2) पृथिवीसूक्ते
(3) अक्षसूक्ते (4) नासदीयसूक्ते
(5) अनुत्तरित प्रश्न

130. 'कामस्तदग्रे समवर्तताधि' मंत्रोऽयं कस्मिन् सूक्ते वर्तते ?

(1) उषःसूक्ते (2) नासदीयसूक्ते
(3) पुरुषसूक्ते (4) नदीसूक्ते
(5) अनुत्तरित प्रश्न

131. 'नासत्या' इति पदेन कोऽभिहितः ?

(1) अश्विनौ (2) रुद्रः
(3) विष्णुः (4) बृहस्पतिः
(5) अनुत्तरित प्रश्न

132. 'पुरोहित' इत्यभिधानेन अभिहितः कः ?

(1) सोमः (2) सूर्यः
(3) अग्निः (4) इन्द्रः
(5) अनुत्तरित प्रश्न

133. "येनेमा विश्वा च्यवना कृतानि, यो दासं वर्णमधरं गुहाकः......" इत्यनेन कः देवः स्तुतः ?

(1) उषस् (2) इन्द्रः
(3) नासदीयः (4) प्रजापतिः
(5) अनुत्तरित प्रश्न

134. "उतामृतत्वस्येशानो यदन्नेनातिरोहति" इत्यस्याम् ऋचायां कः अन्नेनातिरोहति ?

(1) पुरुषः (2) प्रजापतिः
(3) कोऽपि ऋषिः (4) वाग्देवता
(5) अनुत्तरित प्रश्न

135. 'ऋतावरी' इति विशेषणेन का देवता विशिष्टा ?

(1) अदितिः (2) दितिः
(3) उषस् (4) पृथिवी
(5) अनुत्तरित प्रश्न

136. 'पुराणी युवतिः' का ?

(1) उषस् (2) वाक्
(3) दितिः (4) अदितिः
(5) अनुत्तरित प्रश्न

137. ऋक्संहितायां सृष्ट्युत्पत्तिनिदर्शकं सूक्तमस्ति –

(1) नासदीयसूक्तम् (2) रुद्रसूक्तम्
(3) वरुणसूक्तम् (4) प्रजापतिसूक्तम्
(5) अनुत्तरित प्रश्न

138. शिवसंकल्प सूक्तस्य संबद्धो वेदः कः ?

(1) अथर्ववेदः (2) शुक्लयजुर्वेदः
(3) ऋग्वेदः (4) सामवेदः
(5) अनुत्तरित प्रश्न

139. 'उरुचक्षस' इति कस्य देवस्य विशेषणमस्ति ?

(1) वरुणस्य (2) रुद्रस्य

(3) वायोः (4) इन्द्रस्य

(5) अनुत्तरित प्रश्न

140. वाक्सूक्तस्य ऋग्वैदिक मण्डलक्रमः कः ?

(1) 10/129 (2) 10/117

(3) 10/135 (4) 10/125

(5) अनुत्तरित प्रश्न

141. 'कस्मैदेवाय हविषा विधेम' इति मन्त्रः कस्मिन् सूक्ते वर्तते ?

(1) नासदीयसूक्ते (2) हिरण्यगर्भसूक्ते

(3) सूर्यसूक्ते (4) पुरुषसूक्ते

(5) अनुत्तरित प्रश्न

142. ब्रह्मणस्पतिः कः अस्ति ?

(1) विष्णुः (2) रुद्रः

(3) बृहस्पतिः (4) अश्विनौ

(5) अनुत्तरित प्रश्न

143. क्रन्दसी संयती कं विह्वयेते ?

(1) सोमम् (2) वरुणम्

(3) इन्द्रम् (4) बृहस्पतिम्

(5) अनुत्तरित प्रश्न

144. च्यवानम् ऋषिं जरस अमुञ्चतम्

(1) अग्निः (2) अश्विनौ

(3) वरुणः (4) बृहस्पतिः

(5) अनुत्तरित प्रश्न

145. शिवसंकल्पसूक्तस्य ऋषिः कः ?

(1) विश्वामित्रः

(2) वसिष्ठः

(3) भारद्वाजः

(4) आदित्ययाज्ञवल्क्यः

(5) अनुत्तरित प्रश्न

146. शुक्ल-कृष्ण भेदाभ्यां का वेदसंहिता ?

(1) यजुर्वेदसंहिता (2) ऋग्वेदसंहिता

(3) सामवेदसंहिता (4) अथर्ववेदसंहिता

(5) अनुत्तरित प्रश्न

147. ज्योतिष-गणनामाश्रित्य ऋग्वेदस्य रचनाकालं को निर्धारितवान् ?

(1) मैक्समूलरः (2) तिलकः

(3) विन्टरनिट्ज़ः (4) यास्कः

(5) अनुत्तरित प्रश्न

148. ऋग्वैदिक – द्युस्थानीयो देवता कः ?

(1) इन्द्रः (2) सूर्यः

(3) रुद्रः (4) अग्निः

(5) अनुत्तरित प्रश्न

149. 'काण्व' शाखा कया संहितया सम्बद्धा ?

(1) यजुर्वेदसंहितया (2) ऋग्वेदसंहितया

(3) अथर्ववेदसंहितया (4) सामवेदसंहितया

(5) अनुत्तरित प्रश्न

150. अहिम् हत्वा सप्त सिन्धून् कः अरिणात् ?

(1) वरुणः (2) वायुः

(3) बृहस्पतिः (4) इन्द्रः

(5) अनुत्तरित प्रश्न

## रफ कार्य के लिए स्थान / SPACE FOR ROUGH WORK